This Question Paper consists of 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

| Roll No. अनुक्रमाङ्कः | | | | | | | | | | | | | Code No. 63/SS/A गूढसंख्या |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|

Set स्तबकः **A**

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (347)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ______________________

**Signature of Invigilators** 1. ______________________
**(निरीक्षकयोः हस्ताक्षरम्)**
2. ______________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3 वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या 63/SS/A, सेट- A नूनं लेख्या ।
7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# BHARATIYA DARSHAN
## भारतीयदर्शनम्
## (347)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10**, [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) सांख्यकारिकाः केन लिखिताः ?

(क) ईश्वरकृष्णेन (ख) वाचस्पतिमिश्रेण

(ग) आसुरिणा (घ) सदानन्दयोगीन्द्रेण

(2) एतेषु सत्कार्यवादाभ्युपगमे हेतुः नास्ति–

(क) उपादानग्रहणात् (ख) असदकरणात्

(ग) कार्याभावात् (घ) कारणभावात्

(3) प्रत्यक्षम् अनुमानं चेति द्वे एव प्रमाणे इति केषां मतम् ?

(क) चार्वाकाणाम् (ख) वैशेषिकाणाम्

(ग) आर्हतानाम् (घ) नैयायिकानाम्

(4) के शब्दप्रमाणं न स्वीकुर्वन्ति ?

(क) पौराणिकाः (ख) वेदान्तिनः

(ग) भाट्टाः (घ) बौद्धाः

(5) वेदान्तमते अभावग्रहणे कः सन्निकर्षः ?

(क) संयोगः (ख) संयुक्ततादात्म्यः

(ग) तादात्म्यः (घ) न कोऽपि

(6) वेदान्तमते अभावः कतिविधः ?

(क) त्रिविधः (ख) चतुर्विधः

(ग) द्विविधः (घ) षड्विधः

(7) कस्याम् उपनिषदि तेजःप्रमुखा सृष्टिः प्रतिपाद्यते ?

(क) तैत्तिरीयोपनिषदि (ख) कठोपनिषदि

(ग) बृहदारण्यकोपनिषदि (घ) छान्दोग्योपनिषदि

(8) अद्वैतवेदान्तमते सूक्ष्मशरीरे कति अवयवाः विद्यन्ते ?

(क) एकादश (ख) त्रयोदश

(ग) सप्तदश (घ) षोडशः

(9) तात्पर्यनिर्णायकेषु षट्सु लिङ्गेषु अन्यतमं हि–

(क) विवेकः (ख) वैराग्यम्

(ग) प्रयोजनम् (घ) उपपत्तिः

(10) विषयेभ्यो बाह्येन्द्रियाणां निग्रहः किमुच्यते ।

(क) शमः (ख) दमः

(ग) उपरतिः (घ) वैराग्यम्

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) अतिदूरात् वस्तु न दृश्यते इत्यस्य दृष्टान्तः कः ? अतिसामीप्यात् च वस्तु न दृश्यते इत्यस्य दृष्टान्तः कः ? 1+1

(2) त्रिविधं दुःखं किम् ? सांख्यकारिकाकारमते सांख्यशास्त्रस्य प्रयोजनं किम् ? 1+1

(3) किं नाम निर्विकल्पं ज्ञानम् ? उदाहरणम् एकं लिखत । 1+1

(4) का बुद्धिः ? किं च चित्तम् ? 1+1

(5) पौरुषेयत्वं नाम किम् ? योग्यता नाम का ? 1+1

(6) तटस्थलक्षणस्य लक्षणं किम् ? तटस्थलक्षणस्य उदाहरणमेकं दीयताम् । 1+1

(7) अज्ञानं भावरूपम् इत्यस्य तात्पर्यं किम् ? अविद्या इत्यत्र नञः कोऽर्थः ? 1+1

(8) अध्यारोपः नाम कः ? एकः दृष्टान्तः प्रदीयताम् । 1+1

(9) किं तावत् निदिध्यासनम् ? का नाम चित्तवृत्तिः ? 1+1

(10) समाधेः अन्तरायाः के ? प्रत्याहारः नाम किम् ? 1+1

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) चतुर्णाम् अभावभेदानां समासेन परिचयः प्रदीयताम् ।

(2) अर्थापत्तिप्रमाविषये लघुटिप्पणीमेकां लिखत ।

(3) अन्तःकरणस्य सावयवत्वं प्रतिपादयत ।

(4) मायायाः आश्रयत्वविषयत्वविचारं समासेन समुपस्थापयत ।

(5) चतुर्विधः प्रलयः समासेन वर्ण्यताम् ।

(6) अविद्यायाः अनिर्वचनीयत्वं नाम किमिति वर्ण्यताम् ।

(7) अद्वैतवेदान्तदर्शने परमार्थतः सृष्टिरेव नास्ति – वाक्यमिमं विचारयत ।

(8) अनुबन्धानां संक्षेपेण परिचयः दीयताम् ।

(9) अद्वैतवेदान्तानुसारेण विदेहमुक्तिं समासेन वर्णयत ।

(10) शिवज्ञानेन जीवसेवा – इति विषयं विवेकानन्ददर्शनम् अनुसृत्य लिख्यताम् ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) पुरुषसद्भावे यानि कारणानि सांख्यकारिकायां निगदितानि तानि संक्षेपेण आलोच्यन्ताम् ।

(2) अध्यासभेदान् संक्षेपेण वर्णयत ।

(3) अद्वैतवेदान्ते सृष्टिप्रसङ्गे अध्यारोपापवादौ वर्णनीयौ ।

(4) निर्विकल्पसमाधेः अङ्गानि कानि ? तेषां समासेन परिचयः दीयताम् ।

(5) वेदान्ते कः अधिकारी भवति इति विषयं विस्तरेण वर्णयत ।

---